# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- आचार्य-१ (SEM-1)** | **प्रश्नपत्र-३** | **गुणा: - ७०** |
| **विषय:- साहित्यम्** | **CC-412** | **समय: - ०३ त: ०६** |
| **दिनाङ्क: - ०७/१२/२०१६** | **सन्दर्भग्रन्थ: - ध्वन्यालोक: ( प्रथमोद्योत: )** | |

**॥ प्रथमान्विति: ॥**

**प्र-१ द्वयोरेकं ससन्दर्भं स्पष्टयतु । ०४**

१. योऽर्थ: सहृदयश्लाघ्य: काव्यात्मेति व्यवस्थित: ।
वाच्य प्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥

२. केचित्पुनर्लक्षणकरणशालीनबुद्ध्यो: ध्वनेस्तत्त्वं गिरामगोचरं सहृदयसंवेद्यमेव समाख्यातवन्त: ।

**प्र-२ आनन्दवर्धनाचार्यस्य जीवनपरियं विस्तरेण यच्छत । १२**

**अथवा**

**काव्यास्यात्मा ध्वनि: - इति काव्यलक्षणं ग्रन्थोक्तदिशा विवेचयत ।**

**प्र-३ द्वयो: उत्तरं लिखत । ०४**

१. ध्वन्यालोकस्य मङ्गलाचरणं लिखत ।

२. अभाववादिनां मतं संक्षेपेण लिखत ।

३. ध्वनिविरोधिना के विकल्पा: निर्दिष्टा:?

**॥ द्वितीयान्विति: ॥**

**प्र-४ निम्नलिखितयोरेकस्य सप्रसङ्गव्याख्या कार्या । ०४**

१. शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थ त्तत्वज्ञैरेव केवलम् ॥

२. यथा पदार्थद्वारेण वाक्यार्थ: सम्प्रतीयते ।
वाच्यार्थपूर्विका तद्वत् प्रतिपत् तस्य वस्तुन: ॥

**प्र-५ प्रतीयमानार्थेन वाच्यवाचकयो: सम्बन्धं ग्रन्थोक्तदिशा समीक्षणं कुरुत । १२**

**अथवा**

**रसादीनां व्यङ्गत्वं स्फुटं प्रतिपाद्यताम् ।**

**प्र-६ द्वयो: उत्तरं लिखत । ०४**

१. शोक: कथं श्लोकत्वं प्राप्नोति?

२. विधिरूपे वाच्ये निषेधरूपव्यङ्गस्य उदाहरणं किम्?

३. आनन्दवर्धनस्य के के ग्रन्था: सन्ति? लिखत ।

**॥ तृतीयान्विति: ॥**

**प्र-७ अधोनिर्दिष्टाभ्याम् एकं ससन्दर्भं विवेचयन्तु । ०४**

१. आक्षेपेऽपि व्यङ्ग्यविशेषाक्षेपिणो वाच्यस्यैव चारुत्वम् ।
प्राधान्येन वाक्यार्थ आक्षेपोक्तिसामर्थ्यादिव ज्ञायते ॥

२. व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः ।

समासोक्त्यादयस्तत्र वाच्यालंकृतयः स्फुटाः ॥

**प्र-८ उपसर्जनीकृतस्वार्थौ – इत्यस्याशयं ग्रन्थानुसारेण विवेचयत ।** **०८**

**अथवा**

**सङ्करालङ्कारे ध्वनेरन्तर्भावोऽनुचित इति दर्शयत ।**

**प्र-९ यथेच्छं त्रयाणां लघूत्तराणि लिखत ।** **०३**

१. आलोकार्थीजनः कुत्र यत्नवान् भवति?

२. शब्दगताः चारुत्वहेतवः के?

३. कस्य नखाः वः त्रायन्ताम्?

४. सूरिभिः कथितः – इत्यत्र कोऽभिप्रायः?

५. कुत्र लावण्यं विभाति?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० द्वयोरेकं ससन्दर्भं विचेयन्तु ।** **०४**

१. तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रस्थितौ ।

ध्वनेः स एव विषयो मन्तव्यः संकरोज्झितः ॥

२. भक्त्या बिभर्ति नैकत्वं रूपभेदाद्वयं ध्वनिः ।

अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया ॥

**प्र-११ लक्षणायां ध्वनेरन्तर्भावोभवितुमर्हति न वा? प्रतिपादयत ।** **०८**

**अथवा**

**विवक्षितान्यपरवाच्यध्नेरुदाहरणं ग्रन्थोक्तदिशा विवेचयत ।**

**प्र-१२ त्रयाणां लघूत्तराणि लिखत ।** **०३**

१. सर्वविद्यानां मूलं किमस्ति?

२. कस्य स्वरूपं ब्रूते?

३. सुवर्णपुष्पां पृथिवीं के चिन्वन्ति?

४. प्रथमोद्योते कति कारिकाः सन्ति?

५. अन्ये कं भाक्तमाहु?